मप्यदोषमाह मदनरत्ने सुमन्तुः "पिता यस्य तु नाधानं कथं पुत्रस्तु कारयेत्। अग्निहोत्रेऽधिकारोऽस्ति शङ्खस्य वचनं यथेति" नाधानं कृतमित्यर्थः एतदाज्ञायामेवेति हेमाद्रिः यत्तु "पितुः सत्यप्यनुज्ञाने नादधीत कदाचनेति" "तत्रात्यधिकारे ज्ञेयम्"। एवं स्मृतिसूत्रयोराधारानस्याकरणे प्रत्यवायश्रवणादाधानं नित्यमेव। एतेन कलिवर्ज्येषु आदित्यपुराणेऽग्निहोत्रस्योत्कीर्त्तनदर्शनेन गौड़ानां तदनाचरणमनाचार एव स्मृतितः पुराणस्य दुर्ब्बलतया स्मृतिविहिताधानस्य बाधकत्वायोगात् "नैवानाहिताग्निर्म्रियेतेति" श्रुतेः सर्व्वापेक्षया बलवत्त्वाच्च। तेन मृत्युकालात् पूर्व्वमप्याधानं कर्त्तव्यमिति प्रतीयते व्यक्तं भविष्यति चैतदुपरिष्टात्। आधानस्वरूपादिकम् आश्व०श्रौ०सू० नारायणीयवृत्त्योर्दर्शितं यथा "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" सू० १२। अग्न्याधेयप्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्म्माणि, आधानं कृत्वैव कर्त्तव्यानीत्यर्थः। तत्र हेतुमाह, वैतानिकानीति। वितानेषु भवानि वैतानिकानि, वितानसाध्यानीत्यर्थः। वितानशब्दोऽस्मिन् सूत्रे भावसाधनोऽग्नीनां विस्तारवाची, पूर्व्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्म्मवचनः। एतदुक्तं भवति, गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्म्माणि, अग्नयस्त्वाधानसाध्याः, तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्म्मणाम्। बहुवचनं सर्व्वश्रौतपरिग्रहार्थं सर्व्वाणि श्रौतान्याधानादूर्द्ध्वमेव कर्त्तव्यानि न किञ्चिदपि, श्रौतमाधानादर्व्वागित्यनेन प्रकारेणाधानस्य कर्म्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात् साधितं भवति। तद्यदि कर्म्मार्थं स्यात् प्रति कर्म्म क्रियेत, तत्र कस्यचित् परस्तादपि स्यात्, यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः क्षामवत्यादयो न भवन्ति, अवकीर्णिना पश्चाद्यर्थश्चाधानं न कर्त्तव्यं, साधितं भवति न परस्तात्" वृत्तिः "अग्न्याधेयम्" १,२,६, सू० प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदङ्गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं, तत्कर्त्तव्यमित्यर्थः ६ वृत्तिः। कस्मिन् काल इत्याह। "कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" १०सू०। एतेषां कस्मिंश्चित् ११। वसन्ते पर्व्वणि ब्राह्मण आदधीत" १२। ग्रीष्मवर्षाशरत्सु च क्षत्रियवैश्योपकृष्टाः १३। यस्मिन् कस्मिंश्चिदृतावादधीत" १४। सूत्राणि एषां नारायणीया वृत्तिः "फल्गुनीष्विति पूर्व्वे उत्तरे च गृह्येते, अविशेषाद्बहुवचनाच्च। प्रोष्ठपदास्तूत्तरे एव। अतः सप्त एतानि नक्षत्राणि, तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्त्तव्यमित्यर्थः १०। एतेषां कस्मिंश्चित् पर्व्वणि। एवमेतत्सूत्रमर्थतो द्रष्टव्यम्। उत्तरञ्च सूत्रं "वसन्ते पर्व्वणि ब्राह्मण आदधीत" इति। एवं कृते सर्व्वमनुगुणं भवति एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्व्वणि वाग्न्याधेयं कर्त्तव्यमितीदं सूत्रं पर्व्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्व्वसूत्रन्तु केवलं नक्षत्राणामेवाधानसम्बन्धं विदधाति। अतो द्वौ पक्षौ स्तः। समुच्चयस्तत्र प्रथमः कल्पः। तदसम्भवे केवलं नक्षत्रमेवेति विनिवेशो युक्तः। इदं कल्पद्वयं सोमाधानवर्जितेषु सर्व्वेष्वाधानेषु भवति ११। इदमपि सूत्रमर्थत एवं भवति। अनेन वसन्ते ब्राह्मणगुणकमाधानं विधीयते १२। वैश्यस्त्वक्षकर्म्मोपजीवी उपकृष्ट इत्युच्यते। अस्मिन् सूत्रे त्रीण्याधानानि विधीयन्ते। ग्रीष्मे क्षत्रियगुणकं, वर्षासु वैश्यगुणकं, शरदि उपकृष्टगुणकञ्च। एते वसन्तादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवः। वसन्तादयो मासाश्चैत्रादय एव १३। आदधीतेति स्थिते पुनरादधीतेतिवचनं आपत्कल्पोऽयमाधानविधिरिति दर्शयति। अत्यापदि मुमूर्षोः सर्व्वेष्वृतुषु आधानं कर्त्तव्यं "नैवानाहिताग्निर्म्रियेतेति"। इदञ्चापरमाधानं, पूर्व्वोक्तानि चत्वारि, तेषु सर्व्वेषु पर्व्वनक्षत्रविधय उपसंहर्त्तव्याः, न पर्व्वर्त्तुस्वातन्त्र्येणाधानस्य कालविधयो भवेयुः। अत एव सूत्रकारः पर्व्वनक्षत्रविधीनामृतुविधिभिः सम्बन्धानामेवाधानकालताप्रदर्शनार्थमेवैतेषां कस्मिंश्चिद्वसन्त इति पर्व्वनक्षत्रसमुच्चयविधिपरे सूत्रे उत्तरसूत्राय पठितव्यम् ऋतुशब्दं व्यतिषज्य पठितवान्। पर्व्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति, तत्रैव तयोरन्तर्भावदर्शनादिति १४। "अश्वत्थाच्छमीगर्भादरणी आहरेदनवेक्षमाणः १६। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वाहरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति, पूर्णाहुत्यन्तमग्न्याधेयम् १७। शम्या गर्भः शमीगर्भः। शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। तच्चाधानार्थम्, आहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानो-